# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 5 | गुणाः – ५० |
| विषयः – फलितज्योतिषम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – भावकुतूहलम् | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या ।**

१ तनुकोशसहोदरबन्धुसुता रिपुकामविनाशशुभा विबुधैः ।
पितृभं तत आप्तिरपाय इमे क्रमतः कथिता मिहिरप्रमुखैः ॥
२ दिनपतौ नवमे हरिभे यदा सहजहानिरवश्यमिहाङ्गिनाम् ।
धनगते रविजे तनुगे गुरावगुरुगे जननी न हि जीवति ॥
३ गुरोः सुतागारपतिः सपापो बलेन हीनो मनुजो विपुत्रः ।
अरावपापे निधने तदीशः सुतेन हीनो मनुजस्तदानीम् ॥

**प्रश्नः २ क्लीबयोगविषये चर्चां कुरुत ।**

**प्रश्नः ३ अरिष्टभङ्गयोगान् वर्णयत ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या ।**

१ केमद्रुमे सुरपते रविनन्दनोऽयं देशान्तरं व्रजति पुत्रकलत्रहीनः ।
धर्मच्युतो विकलितो गदसद्यभीतो नानाधितापसहितो महितोषदीनः ॥
२ सौभाग्यं सप्तमस्थाने शरीरं लग्नचन्द्रयोः ।
वैधव्यं निधनस्थाने पुत्रे पुत्रं विचिन्तयेत् ॥
३ भवति चेदनिमीलितलोचनं शुभदृशां दरफुल्लकपोलकम् ।
अलमलक्षितदन्तमुदीरितं पतिहितं सततं स्मितमुत्तमम् ॥

**प्रश्नः ५ भाललक्षणविषये चर्चां कुरुत ।**

**प्रश्नः ६ चन्द्रावस्थाफलं निरूपयत ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ सहजे सहजाधीरो षडादित्रयगेऽपि वा ।
सहजेऽपि विशेषेण भ्रातुः सौख्यं न जायते ॥

२ जीवज्ञशुक्रा नवमे बलिष्ठाः सुतेशदृष्टा यदि जन्मकाले ।
स पुण्यकर्ता नृपतेरमात्यो नृपालजातो नरपालवर्यः ॥

३ लाभेशो यदि केन्द्रस्थो लाभाधिक्यं प्रजायते ।
षडादित्रयभे नीचे लाभवाधा नृणां सदा ॥

**प्रश्नः ८ नवमभावविषये चर्चां कुरुत ।**

**प्रश्नः ९ दशाफलाध्यायस्य सारांशं लिखित ।**

**प्रश्नः १० दशानां प्रश्नानामुत्तरं लिखत ।**

१ भावलकुतूहलम् इति ग्रन्थे कति अध्यायाः सन्ति ?
२ मेषराशेः अधिपतिः ग्रहः कः ?
३ मारकस्थानानि कानि ?
४ कलत्रभावः अर्थात् किम् ?
५ त्रिकोणभावाः के ?
६ भावकुतूहलग्रन्थस्य ग्रन्थकारः कः ?
७ ग्रहाणां बाल्यादि-अवस्था कतिविधा ?
८ 'पातालः' इति कस्य भावस्य संज्ञा ?
९ अष्टमभावस्य अपरं नाम किम् ?
१० सन्ततिविचारः कस्मात् भावात् कर्तव्यः ?
११ ग्रहाणाम् अवस्था कतिविधा ?
१२ सूर्यस्य मित्रग्रहाः के ?
१३ भाग्यभावस्य अपरं नाम किम् ?
१४ आयभावः कः ?
१५ 'स्वः' अर्थात् कः भावः ?

****